संस्कृतवार्ता:

01.06.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· विश्वस्य बृहत्तमस्य लोकसभानिर्वाचनस्य सप्तमान्तिमचरणाय पञ्चवादनान्तं यावत् प्रायश: अष्टपंचाशत् प्रतिशतम् मतदानम् समुट्टंकितम्।

· अधैव ओडिशाविधानसभाया: द्विचत्वारिंशत्-आसनेभ्य: अपि मतदानम् जातम्।

· अरूणाचलसिक्किमप्रदेशयो: विधानसभा-निर्वाचनस्य मतगणना श्वो भविता।

· तैलविपणन उद्योगै: व्यावसायिक परिपूरितवातेन्धनस्य मूल्येषु प्रायश: सप्तति रूप्यकाणाम् अपचिति: कारितास्ति, सहैव वायुयानेन्धने अपि सार्धषट्प्रतिशतस्य अवनति: घोषितास्ति।

· कुन्तक प्रक्षेपणे भारतस्य डी.पी. मनु इत्यनेन अद्य ताइवानदेशे दशमलव-अष्ट पञ्चाशदधिक-एकाशीति मीटरं यावत्कुन्तकं प्रक्षिप्य सर्वश्रेष्ठ प्रदर्शनपूर्वकं स्वर्णपदकं विजितम्।

<u>लोकसभा निर्वाचनस्य अन्तिमचरणम्</u>

लोकसभानिर्वाचनस्य सप्तमान्तिमचरणे अद्य सप्तराज्यानां केन्द्रशासित प्रदेशस्य च सप्तपञ्चाशत् लोकसभासनेभ्य: मतदानं समजायत। चरणेऽस्मिन् पञ्जाबोत्तरप्रदेशयो: प्रत्येकं त्रयोदश, पश्चिमबंगस्य नव, बिहारस्य अष्ट, ओडिशाया: षट्, हिमाचलप्रदेशस्य चत्वारि, झारखण्डस्य त्रीणि चण्डीगढस्य च एकस्मै क्षेत्राय मतदानम् अभवत्। अस्मिन् चरणे आहत्य चतुरधिकनवशतजना: प्रत्याशित्वेन स्वभाग्यं परीक्षन्त: सन्ति। प्रमुखेषु प्रत्याशिषु प्रधानमन्त्री वरिष्ठभाजपेति दल-नेता नरेन्द्रमोदी, अनुरागसिंहठाकुर:, रविशंकरप्रसाद:, कंगनारनौत:, कांग्रेसदलनेता मनीषतिवारी, विक्रमादित्यसिंह:, राष्ट्रीयजनतादलस्य मीसाभारती, तृणमूलकांग्रेसदलनेता अभिषेकबनर्जी च अस्ति। अद्य एव ओडिशा-विधानसभाया: अवशिष्टेभ्य: द्विचत्वारिंतशत्-आसनेभ्योऽपि मतदानम् अभवत्। अनेनैव सह हिमाचल-प्रदेशस्य षट् बिहार-उत्तरप्रदेश-पश्चिम-बंगालानाञ्च एकैकस्मै आसनाय उपनिर्वाचनमपि जातम्। एतन्मध्ये भौमवासरे सम्भाविताया: मतगणनाया: अपि सन्नद्धता: युद्धस्तरेण जायन्ते। लोकसभानिर्वाचनस्य अस्मिन् अन्तिमे सप्तमे च चरणे पञ्चवादनं यावत् अष्टपंचाशत् प्रतिशतम् मतदानम् अभवत्।

## विधानसभामतगणना

अरूणाचलप्रदेशसिक्किमयो: विधानसभानिर्वाचनस्य मतगणना श्व: भविष्यति, तदर्थञ्च सर्वविधसज्जता: सन्नद्धताश्च निर्वाचनायोगेन सन्ति साधिता:। मतगणना च प्रात: षड्वादनत: समारप्स्यते, यत्र प्रथमतया पत्राधारित-Postal Ballats इत्येतेषां गणना भविष्यति, तदनन्तरं च यन्त्रांकितमतानां गणना भविष्यति। अरूणाचलप्रदेशस्य षष्टिविधानसभासु दशविधानसभासनानि भाजपेति दलेन निर्विरोधरूपेण पूर्वमेव विजितानि सन्ति, अत्र मतदानं अप्रैल मासस्य एकोनविंशे दिनांके समजायत।

## तैलविपणन अपचिति:

व्यावसायिक वातीन्धन-भाण्डानि एल.पी.जी. इति महानसीय वातीन्धन-भाण्डानि च सार्धोनसप्तति: रूप्यकै: प्रत्येकांशं यूनिट इति मितं स्वल्पार्घम् जातम् । इंडियन ऑयल कॉर्पोरेशन लिमिटेड इति समवायेन घोषणा कृता यत् दिल्ल्यां सम्प्रति कमर्शियल इति व्यावसायिक वातीन्धन-भाण्डानां विकीर्ण-मूल्यं षट्-सप्तत्युत्तर षट् शताधिक एक सहस्र मितानि रूप्यकाणि जातानि सन्ति।
कोलकातायां कमर्शियल एलपीजी इति व्यावसायिक वातीन्धन-भाण्डानां मूल्यं द्वि-सप्तती रूप्यकै: , मुंबय्यां सार्ध-एकोन-सप्तति:-रूप्यकै: चेन्नय्यां सार्ध सप्तति रूप्यकै: न्यूनीभूतम् अस्ति। एष: मूल्यापचय: अद्य एव क्रियान्वित: जायते। जेट ईंधन एविएशन टर्बाइन फ्यूल इत्यस्य इन्धनस्य च मूल्यं दश-मलवोत्तर पञ्चाधिक-षट्-रूप्यकै: अपचितम् अस्ति।

## भारतर्तु-विज्ञान-विभागम्

पश्चिमोत्तरे मध्यभारते च भीषणतापप्रकोपात् जना: सुखम् अनुभवन्ति। भारतर्तु-विज्ञान-विभागानुसारि उक्तेषु क्षेत्रेषु एकत: द्विडिग्रीसेल्सियस-मितपर्यन्तं अपचिति: आगता, परञ्च पञ्जाब-हरियाणा-दिल्ली-राजस्थान-मध्यप्रदेश-राज्यानां केषुचित् क्षेत्रेषु उष्णलहरी यथावदेव सम्भावितास्ति। अपि च देशस्य पूर्वीय राज्येषु ओडिशा-बिहार-झारखण्डेषु उष्णलह्र्या: प्रकोप: दरीदृश्यते विभागेनानेन पूर्वानुमानित: यत् प्रायद्वीपीय-क्षेत्रेषु प्रमुखतया-कर्णाटकस्य केरलस्य च

भागेषु केषुचित् तथा च तमिलनाडु-रायसीमा-इत्यनयो: केषुचित् प्रभागेषु प्रावृट् स्थिति: अनुकूला वर्तते।

उत्तराखण्ड-पुष्पोत्यका

उत्तराखण्डराज्ये चमोलीस्थिता पुष्पाणां विश्व-न्यास-उपत्यका अद्य पर्यटकेभ्य: उद्घाटिता। अद्य प्रात: अष्टवादने अष्टचत्वारिंशत् पर्यटकानां प्रथमं दलं घांघरियाक्षेत्रम् इति प्रख्यात-उपत्यकां प्रति सम्प्रेषितवत्। नन्दादेवी राष्ट्रिय-उद्यानस्य प्रभागीय-वनाधिकारी बी.बी. मर्तोलिया: उक्तवान् यत् पुष्पोत्यकाया: पर्वाचारणाय भारतीय-नागरिकेभ्य: द्विशतं रूप्यकाणि अपि च वैदेशिकेभ्य: अष्टशतं रूप्यकाणि शुल्करूपेण दातव्यानि भवन्ति। एषा उपत्यका अक्टूबरमासस्य त्रिंशद्दिनांकं यावत् उद्घाटितास्ति।

जापान-कौशलप्रशिक्षणम्

मुम्बय्यां जापानदेशस्य महावाणिज्यदूतेन यागीकोजी-इत्यनेन समुदीरितं यत् महाराष्ट्रस्य चितेभ्य: छात्रेभ्य: प्रौद्योगिकीय-प्रशिक्षु-प्रशिक्षण-कार्यक्रमान्तर्गतं जापानदेशे त्रिवर्षत: पञ्चवर्षाणि यावत् वृत्यौ कौशलप्रशिक्षणं प्रदास्यते। तेनोदीरितं यत् महाराष्ट्रत: छात्राणां प्रथमसमूह: अस्मिन्नेव मासे जापानं प्रति गमिष्यति। साम्प्रतिके समये मुम्बय्यां जापानस्य महावाणिज्यकपदे आरूढ यागी कोजी इत्येष: अस्ति। शुक्रवासरे मुम्बय्या: राजभवने राज्यस्य राज्यपालेन रमेश-बैस-इत्यनेन सह निज वार्ताविधौ एतां वार्तां प्रकाशितवान्। अत्रावसरे राज्यस्य मुख्यसचिव: नितिन-करीर: अपि उपस्थित: आसीत्।

पाकिस्तान - पीओके:

पाकिस्तान सर्वकारेण इस्लामाबाद-उच्च न्यायालयस्य समक्षं स्वीकृतं यत् पाकिस्तानाधिकृतकश्मीरं पी.ओ.के. इति क्षेत्रं एकं वैदेशिकं क्षेत्रम् अस्ति। पाकिस्तानस्य अतिरिक्त अटॉर्नी जनरल इत्याख्येन न्यायाधीशेन प्रतिपादितं यत् कश्मीरस्य कवि: पत्रकार: अहमद फरहाद-शाह: पी.ओ.के. क्षेत्र-मध्ये आरक्षि-निगडने वर्तते, अथ च असौ इस्लामाबाद-उच्च-न्यायालयस्य समक्षम् उपस्थापयितुं नैव शक्यते यतो हि पी.ओ.के. इति क्षेत्रं एका वैदेशिकी भूमि: वर्तते या खलु पाकिस्तानस्य अधिकार क्षेत्रे नैव आयाति। न्यायालय: पाकिस्तानस्य चाराभिकरण-द्वारा रावलपिंडी-स्थितात् तस्य आवासात् शाहस्य अपहरणस्य अनन्तरं तस्य पत्न्या प्रस्तुताया:

याचिकायाः वादश्रवणं करोति स्म। शाहः विगतसप्ताहद्वयात् विलुप्तः वर्तते, अथ च सद्यः एव अभिज्ञातम् अस्ति यत् पी.ओ.के. क्षेत्रस्य आरक्षिबलेन तं विरुध्य प्रकरणद्वयं पञ्जीकारितम् अस्ति। इस्लामाबादस्य उच्च-न्यायालयेन परिपृष्टम् यत् यदि पी.ओ.के. एकं वैदेशिकं क्षेत्रम् अस्ति पाकिस्तानस्य अभिन्नम् अङ्गं नास्ति चेत् तर्हि पाकिस्तान-सैन्यबलानि पाकिस्तानस्य रेंजर्स बलानि च अस्यां भूमौ कथं प्रविष्टानि अभूवन्? वाद श्रवणस्य अवसरे, उच्च-न्यायालयस्य न्यायाधीशः मोहसिनः अख्तरः कयानी इत्यसौ जनानां बलाद् अपहरणस्य प्रथा प्रवर्तनार्थं पाकिस्तानस्य चाराभिकरणानां भृशाम् आलोचनां कृतवान्।

<u>कुन्तकप्रक्षेपणम्</u>

कुन्तक प्रक्षेपणे भारतस्य डी.पी. मनु इत्यनेन अद्य ताइवानदेशे दशमलव-अष्ट पञ्चाशदधिक-एकाशीति मीटरं यावत्कुन्तकं प्रक्षिप्य सर्वश्रेष्ठ प्रदर्शनपूर्वकं स्वर्णपदकं विजितम्। चीनदेशस्य ताइपे के चाओ त्सुन चेंग इत्यनेन च दशमलव-एकविंशत्यधिक षट्सप्ततिमीटरं यावत् प्रक्षिप्य रजतपदकं विजितम्।

।। इति वार्ताः ।।